लक्ष्म्यार्यावृत्तम्

आर्यावृत्तविचित्रा नार्यास्सा जगति सौभगत्वकरी ।
वाय्वा(र्या)काशाद्यखिला भूर्यावद्दार्यते त्वया देव्या ॥ १ ॥

उन्मीलय मन्नयने त्वं मान्ये लक्ष्मि लोकमाताऽसि ।
चिन्मयसुभगावयवे कर्मकरः स्यामहं च तव कमितुः ॥ २ ॥

मन्मथजननि मनोज्ञेऽहंममतारहितयोगिकुलमहिते ।
दृङ्मूलमुन्मूलय मे सम्यक् श्रीकृष्णमूर्तिमीक्षेऽहम् ॥ ३ ॥

कल्मषखण्डनशीले रम्यकपोले सरोजमुखि सुतनो ।
अस्मानपद्महस्ते निर्मलमच्चक्षुरीक्षतां कृष्णम् ॥ ४ ॥

पूर्वं त्रिगुणमयी या सर्वं कार्यं करोति या पश्चात् ।
चार्वम्बुजाक्षवीक्षादक्षं मेऽक्षीह सा रमा कुर्यात् ॥ ५ ॥

वश्यं यस्याः सकलं दृश्यं यस्याः समस्तमपि विश्वम् ।
नश्यत्सु या न नश्येत्क्रिश्यत्सु च या कदाऽपि न क्लिश्येत् ॥ ६ ॥

ज्ञप्तेः करणानि षट् पञ्च कृतेर्हेतुभूतकरणानि ।
बुध्येयुर्यत्कृपया सिध्यैद्वै तत्फलं च यत्कृपया ॥ ७ ॥

सा श्रीराश्रितरक्षादीक्षा दुष्कर्मशिक्षणे च पटुः ।
अश्वास्यं हि दिदृक्षोर्मेऽक्षणोस्तद्वीक्षणोत्सवं दद्यात् ॥ ८ ॥

सङ्गीतसाङ्गवेदा मङ्गलदेवीड मनोज्ञसर्वाङ्गी ।

भङ्गादिदोषरहिता तं गुणराशिं ममेक्षयेत्स्वपतिम् ॥ ९॥

शक्तिः संवित्स्फूर्तिर्मतिः प्रवृत्तिश्च यद्वशे नित्यम् ।
शक्ता त्वमेव सुजनोद्धुर्वी तन्मे प्रदर्शय स्वपतिम् ॥ १०॥

कुण्डलरत्नतिलकसन्नासामणिकण्ठसूत्रहारधरा ।
अङ्गदकङ्कणकाञ्चीकञ्चुकपीतवसनरशनाभा ॥ ११॥

सद्रत्नखचितकिङ्किणिमुद्राग्रैवेयनूपुरादिरुचा ।
भद्रोद्यदिन्दुवदना पद्मा मे मध्ववरदमीक्षयतु ॥ १२॥

या देवी निजरमणस्याङ्कगता पश्यति स्म तं सततम् ।
तस्याः स्तुतिमिति कृतवान्कृष्णदृगर्थी स वादिराजयतिः ॥ १३॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं

लक्ष्म्यार्यावृत्तं सम्पूर्णम्

भारतीरमणमुख्यप्राणान्तर्गत श्रीकृष्णार्पणमस्तु